# Vyasakritam Kailasa Mahimavarnanam

# व्यासकृतं कैलासमहिमावर्णनम्

## Document Information

Text title : Vyasakritam Kailasa Mahimavarnanam

File name : kailAsamahimAvarNanaMvyAsakRRitam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 24| 45-88 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# व्यासकृतं कैलासमहिमावर्णनम्

स नैव तपसा प्राप्यो घोरेणाप्यमितेन वा ।
नान्यैरपीति लोकेषु कैलासः परमो मतः ॥ १॥

न देवेषु यथा देवो मदन्योऽप्यधिकस्तथा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २॥

यथा गोक्षीरमधिकं क्षीरेषु विविधेष्वपि ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३॥

मधुरेषु यथा श्रेष्ठा मधुरा सिकशर्करा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ४॥

यथा घृतेषु सर्वेषु गोघृतं सुमनोहरम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ५॥

परमान्नं यथान्नेषु सर्वेष्वप्यधिकं श्रुतम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ६॥

यथा तरुषु सर्वेषु श्रेष्ठो बिल्वतरुः श्रुतः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ७॥

यथा फलेषु सर्वेषु श्रीफलस्य फलं वरम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ८॥

यथा सर्वेषु वस्त्रेषु दुकूलं चित्रितं वरम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ९॥

भूषणेषु यथा श्रेष्ठं भव्यं रुद्राक्षभूषणम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १०॥

अङ्गरागेषु सर्वेषु श्रेष्ठा भूतिः श्रुतिस्तथा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ११॥

यथा नरेषु सर्वेषु शाङ्करः पुरुषोत्तमः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १२॥

यथा नारीषु सर्वासु नारीरत्नं गिरीन्द्रजा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १३॥

यथा तीर्थेषु सर्वेषु शिवलिङ्गपरम्परा । (शिवगङ्गा परं वरा)
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १४॥

सरोवरेषु सर्वेषु यथा रुद्रसरोवरम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १५॥

यथा पुरेषु सर्वेषु पुरं काशीपुरं परम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १६॥

यथा वापीषु सर्वासु ज्ञानवापी मनोहरा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १७॥

मुक्तिमण्टपमुत्कृष्टं मण्टपेषु यथा मतम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १८॥

यथा वैश्वेश्वरं लिङ्गं लिङ्गेषु श्रेष्ठमुच्यते ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ १९॥

यथा मूर्तिषु सर्वासु दक्षिणामूर्तिरुत्तमा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २०॥

यथा गिरिषु सर्वेषु श्रेष्ठो हिमगिरिः स्मृतः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २१॥

यथा नदीषु सर्वासु नर्मदा शर्मदा सदा ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २२॥

यथा मुनिषु सर्वेषु श्रेष्ठः कलशसम्भवः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २३॥

यथा सर्वेषु मन्त्रेषु शिवपञ्चाक्षरः परः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २४॥

शिवपूजासाधनेषु बिल्वपत्रं यथा परम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २५॥

यथा वेदेषु सर्वेषु रुद्राध्यायः परः स्मृतः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २६॥

यथा सर्पेषु सर्वेषु सहस्रफणिरुत्तमः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २७॥

यथा चतुष्पदां मध्ये प्रसिद्धो वृषभो वरः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २८॥

यथा विद्यासु सर्वासु शिवविद्या वरा स्मृता ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ २९॥

यथा भोज्येषु सर्वेषु शिवनैवेद्यमुत्तमम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३०॥

यथा गृहेषु सर्वेषु श्रेष्ठमन्तर्गृहं मतम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३१॥

मन्दिरेषु यथा श्रेष्ठं रम्यं शाङ्करमन्दिरम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३२॥

उत्तमाङ्गं यथाङ्गेषु शिवानतिकिणाङ्कितम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३३॥

कुमारेषु यथा श्रेष्ठः षण्मुखः श्रुतिषु श्रुतः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३४॥

लोहमध्ये यथा श्रेष्टं काञ्चनं शैलजाप्रियम् ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३५॥

ब्राह्मणेषु यथा श्रेष्ठः शाम्भवो ब्राह्मणोत्तमः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३६॥

यथा रत्नेषु सर्वेषु श्रेष्ठचिन्तामणिः स्मृतः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३७॥

यथा सर्वेषु देशेषु श्रेष्ठः सोऽयं सुधाकरः ।
तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३८॥

पावनेषु यथा भस्म श्रुत्युक्तं पावनोत्तमम् ।

तथा सर्वेषु देशेषु कैलासस्त्वाधकाधिकः ॥ ३९॥

कैलासतुल्यः कुत्रापि वेदेष्वपि न दृश्यते ॥ ४०॥

तथाप्यधिकमस्तीति वक्ता पापकुलाकुलः ।
सन्निधिः सर्वदा यत्र मम तस्मात् किमुत्तमः ॥ ४१॥

कैलाससन्निधिर्नित्यं तेनासावधिकः स्मृतः ।
विचित्रा रचनास्तत्र वेदान्तागोचरा अपि ॥ ४२॥

ततस्तत्र सुखं तावत् तावदन्यत्र कुत्र वा ।
सर्वोत्तमः स कैलासः तत्र मे रमते मनः ॥ ४३॥

॥ इति शिवरहस्यान्तर्गते व्यासकृतं कैलासमहिमावर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । हराख्यः तृतीयांशः । पूर्वार्धम् । अध्यायः २४। ४५-८८ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 24. 45-88 ..

Proofread by Ruma Dewan

*Vyasakritam Kailasa Mahimavarnanam*
pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*